# अभ्यास-प्रश्नपत्रम् - 2021-22
## द्वितीयं सत्रम्
## कक्षा - दशमी
## संस्कृतम् (कोड-122)

**समयः – होराद्वयम्** **सम्पूर्णाङ्काः – 40**

---

**सामान्यनिर्देशाः -**

☞ कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 6 पृष्ठानि मुद्रितानि सन्ति।
☞ कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 प्रश्नाः सन्ति।
☞ उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांकः अवश्यं लेखनीयः।
☞ प्रश्नसंख्या प्रश्नप्रानुसारम् एव लेखनीया।
☞ सर्वेषां प्रश्नानां उत्तराणि स्कृतेन एव लेखनीयानि।
☞ प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**वर्णनात्मकाः प्रश्नाः** **40 अंकाः**

| | | |
|---|---|---|
| | **अपठितावबोधनम्** | |
| **1.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>मतभेदस्य विरोधस्य वा अभावः एकता इति कथ्यते। एकतायाः अपरं नाम "ऐक्यं सङ्घटनं" वा इत्यपि वर्तते। मनुष्याणां सांसारिकजीवनस्य कृते एकता महान् लाभकारी गुणः अस्ति। यदि जगति मनुष्येषु एकता न भवेत् तर्हि तेषां एकदिनस्यापि जीवनं कठिनं भविष्यति। एकतायां महती शक्तिः वर्तते। यत् कार्यं एकेन जनेन न कर्तुं शक्यते तद् बहूनां व्यक्तिनां सम्मिलितेन प्रयासेन सुगमतया भवति। वर्तमानसमये एकतायाः महान् अभावः अस्ति। परिवारे समाजे देशे तथा सम्पूर्णे संसारे सर्वत्रैव अनेकतायाः मतभेदस्य च भयंकरः झंझावातः दरीदृश्यते। एतस्य प्रधानं कारणं केवलं स्वार्थपरता एव अस्ति। सर्वे स्वकीयमेव हितं पश्यन्ति न अन्येषाम्। अतः एकतायाः स्थापनाय परस्परं स्नेह-सौहार्दवर्धनाय च स्वार्थसाधनेन सहैव परेषामपि स्वार्थरक्षणाय ध्यानदानं परमावश्यकं वर्तते। परोपकारः एव मानवस्य विशिष्टं गुणं वर्तते। परोपकारहीनः मानवः पशुः कथ्यते। | **10** |
| | **अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) कस्यां महती शक्तिः वर्तते?<br>(ii) के स्वकीयमेव हितं पश्यन्ति?<br>(iii) किं मानवस्य विशिष्टं गुणं वर्तते? | 1X2=2 |
| | **आ. पूर्णवाक्येन लिखत – (केवलं प्रश्नद्वयम्)**<br>(i) एकतायाः अपरं नाम किं वर्तते?<br>(ii) कुत्र अनेकतायाः मतभेदस्य च भयंकरः झंझावातः दरीदृश्यते?<br>(iii) कः पशुः कथ्यते? | 2X2=2 |

| | | |
|---|---|---|
| | **इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।**<br>**ई. यथानिर्देशम् उत्तरत – (केवलं प्रश्नत्रयम्)**<br>(i) 'द्वितीयम्' इत्यस्य किं समानार्थकपदं गद्यांशे प्रयुक्तम्?<br>(ii) 'पश्यन्ति' इति क्रियायाः कर्तृपदं गद्यांशात् चित्वा लिखत।<br>(ii) 'अनेकता' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत।<br>(iv) 'परोपकारहीनः मानवः' इत्यनयोः विशेषणपदं किम्? | 1<br>1X3=3 |
| | | |
| | **रचनात्मकं कार्यम्** | |
| **2.** | **भवान् रामकुमारः। परीक्षायाः सिद्धता सन्बन्धे मित्रं प्रति लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं च पुनः उत्तरपुस्तिकायां लिखत।**<br>प्रयागराजः<br>22.03.2022<br>प्रिय मित्र.......... रमेश!<br>नमो नमः।<br>अत्र सर्वं (i) ..................वर्तते। बहुदिनेभ्यः भवतः पत्रं न (ii).............। तत्र सर्वे कुशलिनः स्युः इति कामये। (iii)................... मम वार्षिकपरीक्षा भविष्यति। अतः अहं नियमितरूपेण अध्ययनं कुर्वन् अस्मि। प्रतिदिनं अहं प्रातः (iv)............... जागरणं कृत्वा नित्यक्रियां सम्पाद्य अध्ययनस्य (v) ..................करोमि तथा (vi)................नववादने शयनं करोमि। अहं प्रातः व्यायामं तथा सायं मित्रैः सह (vii).............अपि करोमि। सम्प्रति दूरदर्शनं न पश्यामि तथा इतस्ततः न भ्रमामि। व्यर्थं केनापि सह न आलपामि। एवं प्रकारेण मम दिनचर्या अस्ति। अधिकाधिकम् (viii).............प्राप्तुं यथाशक्तिः अध्ययनं कुर्वन् अस्मि। अतएव सम्प्रति आवयोः मेलनं कठिनं वर्तते। किन्तु परीक्षानन्तरं आवां मिलित्वा (ix).............द्रष्टुं गमिष्यावः। पत्रं प्राप्य शीघ्रं स्वकीयं समाचारं (x)...............प्रेषय। अधुना लेखनात् विरमामि।<br>तव सुहृद्<br>अमितः<br>मञ्जूषा<br>क्रीडाम्, आरम्भं, कुशलम्, प्राप्तवान्, आगामिमासे, रात्रौ, अंकान्,<br>पञ्चवादने, जन्तुशालां, पत्रमाध्यमेन | 1/2x10=5 |

| | | |
|---|---|---|
| **3.** | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायाः सहायतया पञ्च वाक्यानि संस्कृतेन लिखत –**<br><br>मञ्जूषा –<br>शाकविक्रेता, बालिका, कुक्कुरः, कदलीफलम्, महिलाः, पुरुषाः, हट्टः, फलानि, शाकाः,<br><br>अथवा<br>**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत –**<br>" **मम परिवारः** "<br>मञ्जूषा -<br>पिता, माता, पितामही, पितामहः, अनुजः, भगिनी, सुन्दरम्, गृहम्, वाटिका, ग्रामे, वृक्षः, कृषकः, गृहिणी, मिलित्वा, निवसामः, अहम्, ज्येष्ठः, | 1x5=5<br><br><br><br><br>1x5=5 |
| | | |
| **4.** | **अधोलिखितानि वाक्यानि संस्कृतभाषया अनुद्य लिखत - (केवलं वाक्यपञ्चकम्)**<br>(i) राम अयोध्या के राजा थे। Ram was the king of Ayodhya.<br>(ii) दिल्ली यमुना के किनारे है। Delhi is situated on the bank of the Yamuna.<br>(iii) डॉ. राजेन्द्र प्रसाद भारत के प्रथम राष्ट्रपति थे।<br>Dr. Rajendra Prasad was the first President of India.<br>(iv) दशरथ के चार पुत्र थे। Dasharatha had four sons.<br>(v) तुम कब घर जाओगे? When will you go to home?<br>(vi) मोहन चोर से डरता है। Mohan is afraid of a thief. | 1x5=5 |

| | | |
|---|---|---|
| | (vii) कृष्ण का जन्म कारागार में हुआ था। Krishna was born in the prison. | |
| | **पठितावबोधनम्** | |
| **5.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि संस्कृतेन लिखत –**<br>विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णात् च, परं विचित्रमघटत। चौरः एव उच्चैः क्रोशितुम् आरभत - 'चौरोऽयं, चौरोऽयम्' इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्। तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) का विचित्रा अस्ति?<br>(ख) कदा चौरः गृहाभ्यन्तरं प्रविष्टः?<br>(ग) चौरस्य पादध्वनिना कः प्रबुद्धः?<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) 'चौरोऽयं, चौरोऽयम्' इति कः क्रोशितुम् आरभत?<br>(ख) वराकमतिथिमेव चौरं मत्वा के अभर्त्सयन्?<br>(ग) रक्षापुरुषः तम् अतिथिं कुत्र प्राक्षिपत्? | 3<br><br>1/2x2=1<br><br>1x2=2 |
| | | |
| **6.** | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि संस्कृतेन लिखत –**<br>**विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।**<br>**अन्येषां वदने ये तु ते चक्षुर्नामनी मते॥4॥**<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) अस्मिन् लोके के चक्षुष्मन्तः प्रकीर्तिताः?<br>(ख) केषां वदने चक्षुर्नामनी मते?<br>(ग) 'नेत्रम्' इत्यस्य शब्दस्य कः अर्थः पद्यांशे प्रयुक्तः?<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) लोकेऽस्मिन् विद्वांसः चक्षुष्मन्तः प्रकीर्तिताः।<br>(ख) लोके अन्येषां जनानां वदने नाममात्रं किं भवति?<br>(ग) विद्वांसः कुत्र चक्षुष्मन्तः कथिताः? | 3<br><br>1/2x2=1<br><br>1x2=2 |

| | | | |
|---|---|---|---|
| **7.** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि संस्कृतेन लिखत –**<br><br>**वानरः -** (सगर्वम्) अतएव कथयामि यत् अहमेव योग्यः वनराजपदाय।<br>शीघ्रमेव मम राज्याभिषेकाय तत्पराः भवन्तु सर्वे वन्यजीवाः।<br>**मयूरः -** अरे वानर! तूष्णीं भव।<br>कथं त्वं योग्यः वनराजपदाय?<br>पश्यतु पश्यतु। मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एवाहं पक्षिराजः कृतः। अतः वने निवसन्तं मां वनराजरूपेणापि द्रष्टुं सज्जाः भवन्तु। अधुना यतः कथं कोऽप्यन्यः विधातुः<br>निर्णयम् अन्यथाकर्तुं क्षमः।<br>**काकः -** (सव्यङ्ग्यम्) अरे अहिभुक्।<br>नृत्यातिरिक्तं का तव विशेषता यत् त्वां वनराजपदाय योग्यं मन्यामहे वयम्।<br>**मयूरः** - यतः मम नृत्यं तु प्रकृतेः आराधना।<br>पश्य! पश्य! मम पिच्छानामपूर्वं सौन्दर्यम् (पिच्छानुद्घाट्य नृत्यमुद्रायां स्थितः सन्) न कोऽपि त्रैलोक्ये मत्सदृशः सुन्दरः। वन्यजन्तूनामुपरि आक्रमणं कर्तारं तु अहं स्वसौन्दर्येण नृत्येन च आकर्षितं कृत्वा वनात् बहिष्करिष्यामि। अतः अहमेव योग्यः वनराजपदाय।<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) मम नृत्यं तु प्रकृतेः आराधना इति कः वदति?<br>(ख) कः सगर्वं वदति?<br>(ग) काकः कस्मै व्यङ्ग्यं करोति?<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) कस्य नृत्यं प्रकृतेः आराधना?<br>(ii) मयूरस्य शिरसि राजमुकुटमिव किम् अस्ति?<br>(iii) वानरः किमर्थं वन्यजीवान् तत्परान् भवितुं कथयति? | 3<br><br>1/2x2=1<br><br>1x2=2 |
| | | |

| | | |
|---|---|---|
| 8. | **मञ्जूषात: समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत –**<br><br>**अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।**<br>**तदेवाहु: महात्मान: समत्वमिति तथ्यत: ॥2॥**<br><br>**अन्वय:** - यथा चित्ते (i) .................. भवति तथा (ii) .................. (अवक्रता) भवेत्, (iii) .................. तम् एव तथ्यत: (iv) ....................... इति आहु:।<br><br>**मञ्जूषा -**<br>महात्मान:, अवक्रता, समत्वम्, वाचि<br><br>अथवा<br>**मञ्जूषाया: साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुन: लिखत –**<br><br>**त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।**<br>**परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधी: ॥3॥**<br><br>**भावार्थ:** - य: (i) ..................धर्मयुक्तां वाणीं त्यक्त्वा धर्मविरुद्ध-कठोरवाण्या (ii) ......................करोति, स: तादृश: अज्ञानी भवति यथा कश्चन मधुरं पक्वं परित्यज्य अपक्वं (iii) ......................खादति। अर्थात् सर्वदा सत्यं मधुरं प्रियं चैव (iv) ..........................।<br><br>**मञ्जूषा –**<br>वक्तव्यम्, व्यवहारं, फलम्, मनुष्य: | 1/2x4=2<br><br>1/2x4=2 |
| | | |
| 9. | **अधोलिखितकथांशं समुचित-क्रमेण लिखत –**<br><br>(i) परमर्थकार्श्येन पीडित: स बसयानं विहाय पदातिरेव प्राचलत्।<br>(ii) कश्चन निर्धनो जन: भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्।<br>(iii) करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।<br>(iv) तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जात:।<br>(v) निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा।<br>(vi) एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागत:।<br>(vii) पदातिक्रमेण सञ्चलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्।<br>(viii) एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जात:, पुत्रं द्रष्टुं च प्रस्थित:। | 1/2x8=4 |